**जिताहव** पु० जितः शत्रुराहवे येन । जितकाशिनि हेम० ।

**जितेन्द्रिय** त्रि० जितानि वशीकृतानीन्द्रियाणि येन । यथेष्टमिन्द्रियप्रचारप्रतिरोधिनि १वशीकृतेन्द्रिये “श्रुत्वा स्पृष्ट्वाथ दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः । न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः” मनूक्ते हर्षविषाद-शून्ये २शान्ते जने । इन्द्रियजयस्य शौचकार्य्यः आत्म-दर्शनयोग्यत्वे च हेतुः। यथोक्तं पात० सू० भा० “सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च” पात०सू०। “भवन्तीति वाक्यशेषः शुचेः सत्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शन-योग्यत्वं बुद्धिसत्वस्य भवतीति । एतच्छौचस्थैर्य्यादधि-गम्यत इति” भा०। २कामवृद्धिवृक्षे पु० शब्दार्थचि० ।

**जितु(त्त)म** मिथुनराशौ “क्रियतावुरि जितु(त्त)म कुलीर-लेय-पाथेय-यूककौर्पाख्याः । तौक्षिकआकोकेरो हृद्रोग-श्चान्त्यभं चेत्थम्” ज्यो०त० मेषादिसंज्ञोक्तौ । अतिशयेन जित् जित्तम २अतिशयजययुक्ते त्रि०। [काष्ठमयपदार्थभेदे

**जित्या** स्त्री जि-क्यप् । हृहले कृष्टभूमिसमीकरणार्थं

**जित्वन्** त्रि० जि-क्वनिप् । जयशीले । ततः कर्णा०चतुरर्थ्यां फिञ् । जैत्वनायनि जित्वनोऽदूरदेशादौ ।

**जित्वर** त्रि०जि-क्वरप्। जयशीले “सुराध्वरे घस्मरजित्वरेण” “शस्त्राण्युपायंसत जित्वराणि” भट्टिः “करदीकृतभूपालो भ्रातृभिर्जित्वरैर्द्दिशाम्” माघः । क्वरपः टिड्ढाण “जित्यादि” पा० सूत्रे पाठात् स्त्रियां ङीप् । मुग्ध० मते क्वरप् पित्त्वात् ईप् इति भेदः । सा च २काशीपुर्य्यां त्रिका० ।

**जिन** पु०जि-नक् । १बुद्धे अमरः २अर्हन्नामबौद्धभेदे ३विष्णौ च हेमच० । ४अतिवृद्धे उणा० । ५जित्वरे त्रि०मेदि० । तस्येदमण् । जैन जिनसम्बन्धिनि त्रि० “हस्तिना पीड्य-मानोऽपि न गच्छेज्जैनमन्दिरम्” । तदीयमते च तच्च अर्हच्छब्दे ३८२ पृ० दर्शितम् ।

**जिनसद्मन्** न० ६त० । जिनगृहे चैत्ये विहारे हेमच० ।

**जिनेन्द्र** पु०जिनानामिन्द्रः जिन इन्द्र इव वा । १बुद्धे हला० २व्याकरणकारके विद्वद्भेदे च । स्वार्थे अण् । तत्रार्थे “पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः” कवि-कल्पद्रुमः ।

**जिनेश्वर** पु० ६त० । बुद्धे हेमच० ।

**जिम** भक्षे भ्वा० पर०सक०सेट् । जेमति अजेमीत् । उदित् जेमित्वा जान्त्वा जितः । “जेमनं लेप आहारः” अमरः

**जिरि** हिंसायां स्वा०पर०सक०सेट् । जिरिणोति अजिरा-यीत् । अयं वैदिकः ।

**जिल्लिक** पु० दक्षिणस्थे देशभेदे, सोऽभिजनोऽस्य अण् । तस्य राजा वा अण् । जैल्लिक पित्रादिक्रमेण तद्देश-वासिनि तन्नृपे च बहुषु तस्य लुक् । तद्देशवासिषु तन्नृपेषु च ब० व० । “जिल्लिकाः कुन्तलाश्चैव सौहृ-दाननकाननाः” भा० स० ९अ० ।

**जिव** प्रीणने भ्वा० पर० सक० सेट् इदित् । जिन्वति अजि-न्वीत् जिजिन्व इदित्त्वात् नोपधालोपः जिन्व्यते । “भूमिं पर्ज्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः” ऋ० १। १६४।५१। “इन्द्रेण जिन्वितो मणिरागमन्” अथ० ८।३१।७। “रश्मिरसि क्षयाय त्वा क्षयं जिन्व सवितृ-प्रसूतौ” ताण्ड्य०ब्रा०१।९ । “अपां रेतांसि जिन्वति” ऋ० ८।४४।१६ । “यदा त्वं प्राण ! जिन्वसि” ११।४। १४ । वृद्धौ च अक० । वेदे अस्य क्वचित् आत्म० “स जिन्वते जठरेषु प्रजज्ञिरन्” ऋ० ३।२।११। “जिन्वते वर्द्धते” भा० । वेदे नमध्यस्यैव प्रयोगात् शब्दकल्पद्रुमे अन्त्यस्थवान्तस्थले तस्य निवेशनात् जिम्वतीति प्रयोग-दर्शनाच्च ओष्ठ्यत्वभ्रान्त्या मत्कृतशब्दस्तोममहानिधौ जिम्वतीति ओष्ठ्यान्ततया रूपप्रदर्शनं प्रामादिकमेव । कविकल्पद्रुमे अन्तःस्थवान्तमध्य पाठात् धिविधातोरिव न मध्यत्वस्योचितत्वात् ।

**जिवाजिव** पुंस्त्री जीवञ्जीव+पृषो० । चकोरखगे शब्दर० जातित्वात् स्त्रियां ङीष् ।

**जिव्रि** पु०जॄ-रिक् रस्य वः । १समये २खगे च सि० कौ० ।

**जिष** सेके भ्वा० पर० सक० सेट् । जेषति अजेषीत् । उदित् जेषित्वा जिष्ट्वा । जिष्टः ।

**जिष्णु** पु० जिष-गस्नु । १विष्णौ हेमच० २इन्द्रे २अर्ज्जुने च ३जेतरि त्रि० मेदि० । तत्रार्ज्जुने जयशीले च । “यमुनाह्रदोपरिगहंसमण्डलद्युतिजिष्णु जिष्णुरभ्यतोष्णा-वारणम्” “भुभुजस्य परलोकजिष्णवः” माघः “अहं दुरापो दुर्द्धर्षो दमनः पाकशासनिः । तेन देवः मनुष्येषु जिष्णुनामाऽस्मि विश्रुतः” भा० वि० ४४अ० । इन्द्रे “जयंश्च जिष्णुश्चामित्राँ । जयतामिन्द्रमेदिनौ” अथ० ११।९।१८ । विष्णौ “विष्णुर्विक्रमणाद्देवो जयनात् जिष्णुरुच्यते” भा०उ०६९ अ० । जिष्णुनामनिरुक्तौ ।

**जिह्म** त्रि०हा-मन् सन्वत् आलोपश्च । १कुटिले २मन्दे ३तग-रवृक्षे न० मेदि० । “क्षमितजिह्मवीचिभिः” ऋतुसं० ।